दिनाङ्कः ____________

# डी.ए.वी. पब्लिकविद्यालयाः, दिल्ली-एन.सी.आर.

## संस्कृतम्

## आदर्शप्रश्नपत्रम् -2025-26

## अर्धवार्षिकी परीक्षा

## कक्षा - अष्टमी

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

**निर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 20 प्रश्नाः सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | | | |
|---|---|---|---|---|
| **'क'** | **भागः** | **:** | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख'** | **भागः** | **:** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग'** | **भागः** | **:** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ'** | **भागः** | **:** | **पठितावबोधनम्** | **30 अङ्काः** |

- प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।
- प्रश्नपत्रपठनाय 15 निमेषाः प्रदेयाः।

## खण्डः - 'क'

## अपठितावबोधनम् 10 अङ्काः

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

श्रीनगरं वसुन्धरायाः सौन्दर्यम् अस्ति। अत्र शालीमार-चश्माशाही-निशात बाग-नामधेयानि उद्यानानि सन्ति। अत्र अनेके निर्झराः विविधानि च कुसुमानि शोभन्ते। एतानि उद्यानानि एव श्रीनगरम् अपरं देवलोकं कुर्वन्ति। श्रीनगरस्य मध्ये डलसरोवरः विद्यते। अत्र अनेकाः गृहनौकाः तरन्ति याः पर्यटकेभ्यः गृहनिवासस्य आनन्दं यच्छन्ति। लघुनौकां 'शिकारा' इति जनाः कथयन्ति। लघुनौकाः तु अत्र नववधूरिव सुसज्जिताः भवन्ति। अत्र 'चारचिनार' इति एकं कृत्रिमं पिकनिक-स्थलम् अपि डलसरोवरस्य मध्ये एव अस्ति। श्रीनगरम् एतादृशं सुन्दरम् अस्ति यत् सर्वे जनाः श्रीनगरे भ्रमित्वा प्रकृतेः सौन्दर्ये आनन्दमग्नाः भवन्ति।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) श्रीनगरं कस्याः सौन्दर्यम् अस्ति ?

(ii) श्रीनगरस्य मध्ये कः विद्यते ?

(iii) लघुनौकायाः नाम किम् ?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) डलसरोवरस्य मध्ये किम् अस्ति ?

(ii) श्रीनगरे कानि उद्यानानि सन्ति ?

(iii) सर्वे जनाः कथम् आनन्दमग्नाः भवन्ति ?

**इ. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।** **1**

**ई. निर्देशानुसारम् उत्तरत -** **1×3=3**

(i) 'अनेकाः' इति पदस्य किं विशेष्यपदम् अत्र प्रयुक्तम् ?

(क) पिकनिक-स्थलम् (ख) आनन्दम्

(ग) गृहनौकाः (घ) यच्छन्ति

(ii) 'जनाः' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

(क) अस्ति (ख) कुर्वन्ति

(ग) विद्यते (घ) भवन्ति

(iii) 'पुष्पाणि' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) कुसुमानि (ख) उद्यानानि

(ग) निर्झराः (घ) विविधानि

## खण्डः - 'ख'

## रचनात्मकं कार्यम् 15 अङ्काः

**2. भवतः नाम मोहितः। भवतः विद्यालये वार्षिकोत्सवे संस्कृत-नाटकस्य मञ्चनं भविष्यति। तदर्थं स्वमित्रं गौरवं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।** **½×10=5**

सर्वोदय विद्यालयः

(i)__________

प्रियमित्र (ii)__________

दीपावलिपर्वणः शुभाशंसाः।

अत्र सर्वगतं कुशलम्। भवान् अपि (iii) __________ इति मन्ये अस्माकं विद्यालयस्य वार्षिकोत्सवः (iv) __________ शुभावसरे भविष्यति। तत्र 'रामायणम्' इति नाटकस्य (v) __________ भविष्यति। अहं तस्मिन् नाटके रामस्य अभिनयं (vi) __________। भवान् अवश्यमेव तस्मिन् (vii) __________ भागग्रहणाय आगच्छतु। मम अपि (viii) __________ भविष्यति। सर्वेभ्यः (ix) __________ मम प्रणामाञ्जलिः निवेदयतु।

भवतः मित्रम्,

(x) __________

**मञ्जूषा**

| |
|---|
| मोहितः, मञ्चनम्, उत्सवे, दीपावलीपर्वणः, गौरव,<br>सदस्येभ्यः कुशली, करिष्यामि, उत्साहवर्धनम्, वाराणसीतः। |

3. **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत।** 1×5=5



**मञ्जूषा**

| |
|---|
| अवकरम्, जलम्, वाटिका, स्वच्छम्, बालिका, पिबति, हरीतिमा, वृक्षाः,बालकाः ,वातावरणम्, उपविशन्ति, कर्गदपत्राणि, क्षिपति |

**अथवा**

**'उद्यानम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।**

**मञ्जूषा**

| |
|---|
| बालकाः, विकसन्ति, कन्या, जनाः, धावति, व्यायामम्, भ्रमन्ति, वृक्षाः, सन्ति, पुष्पम्, वृद्धः, हरीतिमा, वातावरणम्। |

3. **अधोलिखितां कथां मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत -** ½×10=5

गोस्वामी तुलसीदासः रामचरितमानसस्य (i) _______ अस्ति। (ii) ______ लोकप्रियः ग्रन्थः अस्ति। भारतीयाः (iii) ________ अस्य ग्रन्थस्य पाठं नित्यं कुर्वन्ति। अस्मिन् ग्रन्थे (iv) ________ जीवनस्य कथायाः वर्णनम् अस्ति। श्रीरामः मर्यादापुरुषोत्तमः आसीत्। श्रीरामः (v) _________ नृपस्य दशरथस्य पुत्रः आसीत्। पितुः आदेशेन सः सीतया लक्ष्मणेन च सह (vi) _________ अगच्छत्। वने लङ्कायाः नृपः (vii) _______ सीताम् अहरत्। तदा श्रीरामः वने स्वभक्तहनुमतः (viii) ________ च सहायतया लङ्काम् अगच्छत्। सः विभीषणस्य सहयोगेन युद्धं कृत्वा रावणस्य (ix) ________ अकरोत्। तदुपरान्तं यदा सः अयोध्याम् अगच्छत् तदा जनाः सम्पूर्णं नगरं दीपकैः (x) _______ अकुर्वन्। तत् दिनम् एव 'दीपावलीपर्व' इति रूपेण प्रचलितम्।

**मञ्जूषा**

| |
|---|
| वनम्, श्रीरामस्य, रावणः, रामचरितमानसम्, प्रकाशितम्, अयोध्यायाः, वधम्, रचयिता, जनाः, वानरसेनायाः। |

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** **1×5=5**

**मोहनः** - नमोनमः ! कथमस्ति भवान् ?

**विकासः** - (i) ________________________ ।

**मोहनः** - परं अहम् अद्यत्वे श्वसनक्रियायां समस्याम् अनुभवामि।

**विकासः** - मम मतानुसारम्  इयम् समस्या प्रदूषणस्य कारणात् अस्ति।

**मोहनः** - (ii) ____________________________________ ।

**विकासः** - अतः अहं तु अद्य कार्यालयं न अगच्छम्, अवकाशे एव अस्मि।

**विकासः** - परम् अनेन किं भविष्यति ? (iii) ____________________ ।

**मोहनः** -  इदं तु सत्यम्। सर्वकारः प्रदूषणनिवारणाय उपायान् कुर्यात्।

**विकासः** - (iv) _______________________________ ।

**मोहनः** -  मित्र ! त्वं सम्यक् वदसि। वयम् अपि प्रयत्नान् कुर्याम। अस्तु,अहम् औषधं स्वीकरोमि।

**विकासः** - (v) _________________________________ ।

**मञ्जूषा**

| |
|---|
| 1. सर्वकारेण तु अनेके उपायाः कृताः। वयम् अपि जागरूकाः भवेयुः। |
| 2. आम् ! प्रदूषणस्य समस्या तु अति गम्भीरा अभवत्। |
| 3. अहम् ईश्वरं प्रार्थये यत् त्वं शीघ्रं स्वस्थः भविष्यसि। |
| 4. कार्यालयं तु प्रतिदिनम् एव गन्तव्यम्। |
| 5. नमोनमः मित्र ! अहं सम्यक् अस्मि। |

## खण्डः - 'ग'

## अनुप्रयुक्त-व्याकरणम्     25 अङ्काः

**5. अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च प्रदत्त-विकल्पेभ्यः चित्वा लिखत -** **1×2=2**

**(i) आ + श् + र् + अ + य् + अः**

(क) आश्रमः  (ख) आश्रयः

(ग) आश्रयम्  (घ) श्रमी

**(ii) विहरति**

(क) व् + इ + ह् + अ + र् + अ + त् + इ

(ख) व् + अ + ह् + अ + र् + अ + त् + ई

(ग) व् + इ + ह् + उ + र् + अ + त् + इ

(घ) व् + इ + ह् + आ + र् + अ + त् + इ

**6. (अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत -** **1×3=3**

(i) श्यामपट्टे एका **सूक्तिः** लिखिता।

(ii) **अष्ट + अध्यायी** व्याकरणस्य प्रसिद्धः ग्रन्थः अस्ति।

(iii) लक्ष्मीः **यथा + इष्टम्** गच्छतु।

अथवा

(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत -

(i) काकः **शरणार्थं** चटकायाः समीपम् आगच्छत्।

(ii) छात्रैः एका **प्रश्न + उत्तरी** आयोजिता।

(iii) यात्री **महा + ऋषिं** दुर्वचनानि वदति स्म।

7. **अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत-** 1×3=3

(i) सर्वं दृष्ट्वा ________ चकिताः सन्ति।

(क) शिष्याः (ख) शिष्यम्

(ग) शिष्यान् (घ) शिष्यः

(ii) जनाः अवकरं ________ क्षिपन्ति।

(क) नदीम् (ख) नद्यै

(ग) नद्याः (घ) नद्याम्

(iii) मूषकाः __________ श्रृगालं नत्वा वदन्ति।

(क) तेषाम् (ख) तेभ्यः

(ग) तम् (घ) तेषु

8. **अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत-** 1×3=3

(i) काकः चटका च ____________ मित्रे स्तः। (2)

(क) द्वौ (ख) द्वे

(ग) द्वयोः (घ) द्वाभ्याम्

(ii) ओलम्पिकक्रीडासु ____________ देशाः सम्मिलिताः अभवन्। (21 )

(क) द्वादश (ख) एकाशीतिः

(ग) विंशतिः (घ) एकविंशतिः

(iii) __________ पुराणानि भवन्ति। (18)

(क) अष्टादश (ख) दश

(ग) अष्ट (घ) अशीतिः

9. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत-** 1×4=4

(i) जलं विना जीवनं न।

(ii) महर्षिः दयानन्दः शिष्यैः सह अतिष्ठत्।

(iii) श्रृगालः प्रतिदिनम् एकं मूषकं खादति स्म।

(iv) श्री गुरवे नमः।

10. **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा वाक्यानि पूरयत -** 1×3=3

(i) छात्राः जिज्ञासया आचार्यं __________।

(क) पश्यन्ति (ख)पश्यति

(ग) पश्यामः (घ) पश्यसि

(ii) महात्मा बुभुक्षितः एव स्वकुटीरम् __________।

(क) अगच्छत　　(ख) अगच्छताम्

(ग) अगच्छन्　　(घ) अगच्छत्

(iii) सर्वे सुखिनः __________।

(क) भव　　(ख) भवतु

(ग) भवन्तु　　(घ) भवत

**11. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत-** 　1×3=3

(i) छात्राः सूक्तिं **पठित्वा** अवदन्।

(ii) तौ इतस्ततः **परि + भ्रम् + ल्यप्** एकं गृहम् अपश्यताम्।

(iii) मूषकाः श्रृगालं **सेव् + तुमुन्** आगच्छन्ति।

**12. (अ) मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत।** 1×2=2

(i) पर्वतेषु __________ हरीतिमा भवति।

(ii) संस्कृतदिवसः__________ आयोज्यते ?

**मञ्जूषा**

| अपि, सर्वत्र, कदा। |
|---|

**अथवा**

**(आ) मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत।**

(i) ते जनाः __________ गच्छन्ति ?

(ii) यदा मम मित्रम् आगच्छति __________ अहं खेलिष्यामि।

**मञ्जूषा**

| तदा, कुत्र, सर्वत्र। |
|---|

**13. (अ) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत -** 　1×2=2

(i) महर्षिः शिष्यस्य भावम् **अवगत्य** अवदत्।

(ii) नागरिकः **दुर् + वचनानि** वदति स्म।

**अथवा**

**(आ) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत-**

(i) यात्री महर्षेः **अपमानं** कृतवान्।

(ii) श्रृगालः मूषकसमूहम् **अनु + सरति**।

## खण्डः - 'घ'

## पठितावबोधनम्　　30 अङ्काः

**14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

मम जलं पोषकशक्त्या परिपूर्णम् अस्ति। एतस्मात् करणात् एव मम तटेषु वृक्षाणां पादपानां वनौषधीनां च दुर्लभाः प्रजातयः उद्भवन्ति। प्राणिजीवनाय स्वच्छं जलं विशुद्धं च पर्यावरणम् आवश्यकम् एव अस्ति परन्तु अनेके जनाः यन्त्रालयानां विषमिश्रितरसायनपदर्थान् मम जले क्षिपन्ति मम जलं च प्रदूषितं कुर्वन्ति। एवं न करणीयम्। मम विशुद्धं जलं एव प्राणिनां जीवनम्। जलं प्रदूषितं न करणीयम्।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** ½×2=1

(i) कस्याः जलं पोषकशक्त्या परिपूर्णम् अस्ति ?

(ii) किं प्रदूषितं न करणीयम् ?

(iii) के जलं प्रदूषितं कुर्वन्ति ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** 1×2=2

(i) प्राणिजीवनाय किम् आवश्यकम् अस्ति ?

(ii) नद्याः तटेषु केषां दुर्लभाः प्रजातयः उद्भवन्ति ?

(iii) जनैः किं न करणीयम् ?

**(इ) निर्देशानुसारम् उचितं विकल्पं चित्वा लिखत -** 1×2=2

(i) 'मम जलं पोषकशक्त्या परिपूर्णम् अस्ति।' अस्मिन् वाक्ये किं कर्तृपदं प्रयुक्तम् ?

(क) मम (ख) जलम्

(ग) अस्ति (घ) परिपूर्णम्

(ii) 'दुर्लभाः' इत्यस्य किं विशेष्यपदं गद्यांशे प्रयुक्तम् ?

(क) प्रजातयः (ख) परिपूर्णम्

(ग) पर्यावरणम् (घ) जीवनम्

**15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **5**

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्यायात्पथः प्रविचलन्ति पदं न धीराः॥**

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) के निन्दन्तु स्तुवन्तु वा ?

(ii) धीराः कुतः पदं न प्रविचलन्ति ?

(iii) युगान्तरे अद्यैव वा किम् अस्तु ?

**(आ) पूर्णपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) के न्यायात् पथः पदं न प्रविचलन्ति ?

(ii) का समाविशतु गच्छतु वा यथेष्टम् ?

(iii) धीराः मरणविषये किं चिन्तयन्ति ?

**(इ) निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) श्लोके 'गच्छतु' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(क) धीराः (ख) लक्ष्मीः

(ग) नीतिनिपुणाः (घ) यथेष्टम्

(ii) 'धैर्यवन्तः' इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम् ?

(क) धीराः (ख) निन्दन्तु

(ग) नीतिनिपुणाः (घ) युगान्तरे

**16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5**

**प्रणवः** - संस्कृतम् इति पदस्य कः अर्थः ?

**विश्वासः** - 'शुद्धम्','परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

**सुमेधा** - संस्कृतभाषायाः कति रूपाणि सन्ति ?

**प्रबुद्धः** - संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम्।

**प्रणवः** - वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति ?

**निष्ठा** - चत्वारः वेदाः ब्राह्मणग्रन्थाः आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते।

**सुमेधा** - लौकिकसंस्कृतस्य आरम्भः कदा मन्यते ?

**विवेकः** - वाल्मीकिकालात् लौकिकसंस्कृतस्य आरम्भः मन्यते। अस्य कृतिः रामायणम् लौकिक संस्कृतस्य आदिमः ग्रन्थः मन्यते

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1**

(i) कस्याः द्वे रूपे स्तः ?

(ii) लौकिकसंस्कृतस्य आदिमः ग्रन्थः किं मन्यते ?

(iii) कस्य आरम्भः वाल्मीकिकालात् मन्यते ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2**

(i) वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति ?

(ii) लौकिकसंस्कृतस्य आरम्भः कदा मन्यते ?

(iii) संस्कृतपदस्य कः अर्थः अस्ति ?

**(इ) निर्देशानुसारम् उत्तरत - 1×2=2**

(i) 'प्रमुखम्' इति पदस्य किं विशेष्यपदं संवादे अस्ति ?

(क) साहित्यम् (ख) संस्कृतम्

(ग) ग्रन्थः (घ) शुद्धम्

(ii) 'अशुद्धम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(क)आरम्भः (ख) शुद्धम्

(ग) संस्कृतम् (घ) लौकिकम्

**17. (अ) मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पूर्णम् अन्वयं पुनः लिखत - 1×4=4**

**पापान्निवारयति योजयते हिताय**

**गुह्यं निगूहति गुणान्प्रकटीकरोति।**

**आपद्गतं च न जहाति ददाति काले**

**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥**

**अन्वयः** - (सन्मित्रं) (i)…………निवारयति, हिताय योजयते, गुह्यं निगूहति (ii)……………
प्रकटीकरोति। काले (सहयोगं) ददाति, आपद्गतं च न (iii)…………। सन्तः इदं
(iv)………………प्रवदन्ति।

**मञ्जूषा**

| जहाति, सन्मित्रलक्षणम्, पापात्, गुणान्। |
|---|

**अथवा**

**मञ्जूषातः समुचितपदानि चित्वा अधोलिखितसूक्तेः भावार्थं पूरयित्वा लिखत-**

**सूक्तिः** - सर्वे भवन्तु सुखिनः।

**भावार्थः** - अस्मिन् (i) …………… सर्वे जनाः (ii)……………… रोगरहिताः च भवन्तु। सर्वेषां
(iii)……….भवतु। कोऽपि (iv) न भवेत्।

**मञ्जूषा**

| कल्याणम्, संसारे, दुखी, सुखयुक्ताः। |
|---|

**18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत, केवलं प्रश्नवाचकपदं न लेखनीयम् -** **1×4=4**

(क) चटका **<u>तृणैः</u>** स्वगृहं निर्मितवती।

(ख) **<u>सत्सङ्गतिः</u>** दिक्षु कीर्तिं तनोति।

(ग) महर्षिः **<u>भारते</u>** अभ्रमत्।

(घ) 'रामायणम्' **<u>वाल्मीकेः</u>** रचना अस्ति।

**19. मञ्जूषायां प्रदत्तपदेभ्यः समुचितपदं चित्वा अधोलिखितां कथां पूरयत-** **½×6=3**

एकस्मिन् __________ एकः काकः एका चटका च द्वे मित्रे अवसताम्। एकदा तौ एकं सुन्दरं गृहं दृष्ट्वा अचिन्तयताम् - आवाम् अपि एतादृशं सुन्दरं __________ रचयिष्यावः। काकः वृक्षे मृत्तिकया सुन्दरं गृहम् अरचयत् चटका च ______ स्वगृहं रचितवती। ग्रीष्मकाले चटकायाः गृहं नष्टम् _______। अतः सा दुःखिता अभवत्। परन्तु ______ गृहं नष्टं न अभवत् यतः तत् मृत्तिकायाः आसीत्। खिन्ना चटका सहायतार्थं काकस्य समीपम् अगच्छत् परं काकः अभिमानी आसीत्। सः तस्याः सहायतां न अकरोत् अपितु ________ अवदत्।

**मञ्जूषा**

| तृणैः, गृहम्, वने, कटुवचनानि, काकस्य, अभवत्। |
|---|

**20. (अ) अधोलिखितानां पदानां समुचितार्थान् मञ्जूषातः चित्वा समक्षं लिखत-** **1×4=4**

(i) वसुन्धरायाः

(ii) प्रणेता

(iii) सहजरूपेण

(iv) नत्वा

**मञ्जूषा**

| |
|---|
| रचयिता, सरलतया, प्रणम्य, भूमेः। |

**अथवा**

**(आ) अधोलिखितानां पदानां समुचितार्थान् मञ्जूषातः चित्वा समक्षं लिखत-** 1×4=4

(i) अनृतम्

(ii) बुद्धिः

(iii) सुन्दरम्

(iv) आनन्देन

**मञ्जूषा**

| |
|---|
| प्रसन्नतया, असत्यम्, मतिः, शोभनम् |

*************

**डी.ए.वी. पब्लिक विद्यालयाः (दिल्ली-एन.सी.आर.)**

**अर्धवार्षिकी परीक्षा -2025-26**

**उत्तरपत्रम्**

**कक्षा - अष्टमी**

**विषयः - संस्कृतम्**

**खण्डः - 'क'**

**(अपठितावबोधनम्)** **10 अङ्काः**

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) वसुन्धरायाः

(ii) डलसरोवरः

(iii) शिकारा

**आ.पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) 'चारचिनार' इति एकं कृत्रिमं पिकनिक-स्थलम् अपि डलसरोवरस्य मध्ये एव अस्ति ।

(ii) अत्र शालीमार- चश्माशाही - निशात बाग-नामधेयानि उद्यानानि सन्ति।

(iii) श्रीनगरं एतादृशं सुन्दरं अस्ति यत् सर्वे जनाः श्रीनगरे भ्रमित्वा प्रकृतेः सौन्दर्ये आनन्दमग्नाः भवन्ति

**इ. 'श्रीनगरम्'** अथवा कोऽपि अन्यः उपयुक्तः शीर्षकः । **1**

**ई. निर्देशानुसारम् उत्तरत -** **1×3=3**

(i) (ग) गृहनौकाः

(ii) (घ) भवन्ति

(iii) (क) कुसुमानि

**खण्डः - 'ख'**

**(रचनात्मकं कार्यम्)** **15 अङ्काः**

2. **पत्रलेखनम् –** **½×10=5**

| | |
|---|---|
| (i) वाराणसीतः | (ii) गौरव |
| (iii) कुशली | (iv) दीपावलीपर्वणः |
| (v) मञ्चनम् | (vi)करिष्यामि |

(vii) उत्सवे
(viii) उत्साहवर्धनं
(ix) सदस्येभ्यः
(x) मोहितः

3. छात्राः स्वेच्छया पञ्च वाक्यानि रचयिष्यन्ति। 1×5=5

4. **अधोलिखितां कथां मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत –** ½×10=5

(i) रचयिता
(ii) रामचरितमानसम्
(iii) जनाः
(iv) श्रीरामस्य
(v) अयोध्यायाः
(vi) वनम्
(vii) रावणः
(viii) वानरसेनायाः
(ix) वधम्
(x) प्रकाशितम्

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** 1×5=5

1. नमोनमः मित्र ! अहम् सम्यक् अस्मि ।
2. आम् ! प्रदूषणस्य समस्या तु अति गम्भीरा अभवत्।
3. कार्यालयम् तु प्रतिदिनम् एव गन्तव्यम् ।
4. सर्वकारेण तु अनेके उपायाः कृताः परन्तु वयम् अपि जागरूकाः भवेयुः ।
5. अहं ईश्वरं प्रार्थये यत् त्वं शीघ्रं स्वस्थः भविष्यसि।

**खण्डः ' -ग'**

**(अनुप्रयुक्त-व्याकरणम्)** 25 अङ्काः

5. **अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च प्रदत्त-विकल्पेभ्यः चित्वा लिखत -** 1×2=2

**(i)** (ख) आश्रयः
**(ii)** (क) व् + इ + ह् + अ + र् + अ + त् + इ

6. **(अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत -** 1×3=3

(i) सु+उक्तिः
(i) अष्टाध्यायी
(ii) यथेष्टम्

**अथवा**

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत -**

(i) शरण+अर्थम्
(ii) प्रश्नोत्तरी

(iii) महर्षिः

**7. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत-** 1×3=3

(i) (क) शिष्याः

(ii) (घ) नद्याम्

(iii) (ग) तम्

**8. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत-** 1×3=3

(i) (ख) द्वे

(ii) (घ) एकविंशतिः

(iii) (क) अष्टादश

**9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत-** 1×4=4

(i) द्वितीया विभक्तिः , विना योगे

(ii) तृतीया विभक्तिः , सह योगे

(iii) द्वितीया विभक्तिः , कर्मकारकस्य योगे

(iv) चतुर्थी विभक्तिः , नमः योगे

**10. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा वाक्यानि पूरयत –** 1×3=3

(i) (क) पश्यन्ति

(ii) (घ) अगच्छत्

(iii) (ग) भवन्तु

**11. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत-** 1×3=3

(i) पठ् + क्त्वा

(ii) परिभ्रम्य

(iii) सेवितुम्

12. (अ) मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत। 1×2=2

(i) सर्वत्र

(ii) कदा

**अथवा**

(आ) मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत।

(i) कुत्र

(ii) तदा

13. (अ) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत - 1×2=2

(i) अव+गत्य

(ii) दुर्वचनानि

**अथवा**

(आ) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत-

(i) अप+मानम्

(ii) अनुसरति

**खण्डः – घ ( पाठ्यपुस्तकम् )** **30 अङ्काः**

14. (अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½×2=1

(i) नद्याः

(ii) जलम्

(iii) जनाः

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(i) प्राणिजीवनाय स्वच्छं जलं विशुद्धम् च पर्यावरणम् आवश्यकम् अस्ति।

(ii) नद्याः तटेषु वृक्षाणां पादपानां वनौषधीनां च दुर्लभाः प्रजातयः उद्भवन्ति।

(iii) जनैः जलं प्रदूषितं न करणीयम्।

(इ) निर्देशानुसारम् उचितं विकल्पं चित्वा लिखत - 1×2=2

(i) (ख)जलम्

(ii) (क) प्रजातयः

**15. (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) नीतिनिपुणाः

(ii) न्यायात्पथः

(iii) मरणम्

**(आ) पूर्णपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) धीराः न्यायात् पथः पदं न प्रविचलन्ति ।

(ii) लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।

(iii) धीराः मरणम् अद्यैव अस्तु युगान्तरे वा इति चिन्तयन्ति ।

**(इ) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) (ख) लक्ष्मीः

(ii) (क) धीराः

**16. (अ) एकपदेन उत्तरत-** **½×2=1**

(i) संस्कृतभाषायाः

(ii) रामायणम्

(iii) लौकिकसंस्कृतस्य

**(आ)पूर्णवाक्येन उत्तरत-** **1×2=2**

(i) चत्वारः वेदाः ब्राह्मणग्रन्थाः आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते।

(ii) वाल्मीकिकालात् लौकिकसंस्कृतस्य आरम्भः मन्यते।

(iii) 'शुद्धम्','परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

**(इ) निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) (क) साहित्यम्

(ii) (ख) शुद्धम्

**17. (अ) मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पूर्णम् अन्वयं पुनः लिखत -** **1×4=4**

**अन्वयः -** (i) पापात्

(ii) गुणान्

(iii) जहाति

(iv) सन्मित्रलक्षणम्

**अथवा**

**मञ्जूषातः समुचितपदानि चित्वा अधोलिखितसूक्तेः भावार्थं पूरयित्वा लिखत-**

**भावार्थः** – (i) संसारे

(ii) सुखयुक्ताः

(iii) कल्याणम्

(iv) दुखी

**18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत,केवलं प्रश्नवाचकपदं न लेखनीयम् -** **1×4=4**

(क) कैः

(ख) का

(ग) कुत्र /कस्मिन्

(घ) कस्य

**19. मञ्जूषायां प्रदत्तपदेभ्यः समुचितपदं चित्वा अधोलिखितां कथां पूरयत-** **½×6=3**

| | |
|---|---|
| (i) वने | (ii) गृहम् |
| (iii) तृणैः | (iv) अभवत् |
| (v)काकस्य | (vi) कटुवचनानि |

**20. (अ) अधोलिखितानां पदानां समुचितार्थान् मञ्जूषातः चित्वा समक्षं लिखत–** **1×4=4**

| | |
|---|---|
| (i) वसुन्धरायाः | भूमेः |
| (ii) प्रणेता | रचयिता |
| (iii) सहजरूपेण | सरलतया |
| (iv) नत्वा | प्रणम्य |

**अथवा**

**(आ) अधोलिखितानां पदानां समुचितार्थान् मञ्जूषातः चित्वा समक्षं लिखत–** **1×4=4**

| | |
|---|---|
| (i) अनृतम् | असत्यम् |
| (ii) बुद्धिः | मतिः |
| (iii) सुन्दरम् | शोभनम् |
| (iv)आनन्देन | प्रसन्नतया |

*************